2024 TPJ | VOLUME 2, ISSUE 3
July - September | ISSN – 2584- 0517

# भारतीयज्ञानसन्दर्भे सततशैक्षिकविकासस्य अवधारणात्मकी सैद्धान्तिकरूपरेखा

**नीलाभतिवारी**

आचार्यः अध्यक्षश्च, शिक्षाशास्त्रविद्याशाखा, केन्द्रीयसंस्कृतविश्वविद्यालयः, भोपालपरिसरः

**प्रस्तावना –**

**ॐ असतो मा सद्गमय तमसो मा ज्योतिर्गमय मृत्योर्मा अमृतं गमय।**[i]

असतः सत्वं प्रति तमसः प्रकाशं प्रति मृत्यो अमृतं प्रति गमनमेव विकासः यत्र सर्वेषां सुखस्य आरोग्यस्य मङ्गलस्य च कामना। किं सम्प्रति विश्वस्मिन्विश्वे विकासस्य तात्पर्यं परिवर्तितम् ? वृद्धिः, समृद्धिः यशः, कीर्तिः, प्रतिष्ठाः, मुक्तिः, ज्ञानम्, सर्वज्ञता, जयः इत्येते सर्वे वा एतेषु केचन विकासस्य पर्यायाः वा परिणामाः इति चिन्तनीयः विषयः। कस्य विकासः भवति ? व्यक्तेः विकासः, समाजस्य विकासः, देशस्य विकासः वा विश्वस्य विकासः इत्यपि विश्लेषणपूर्वकम् अस्माभिः चर्चणीयः। किं विविधेषु देशेषु विकासस्य संकल्पना पृथक् पृथक् भवति? किं व्यक्तेः विकासेन सह स्वतः देशस्य विश्वस्य वा विकासः भवति ? इत्यपि चिन्तनीयम्। विकासस्य कारकाणि कानि सन्ति? कथं विकासः भवेत् ? विकासस्य आधारः कः? कीदृशः विकासः? संधारणीयः सततविकासः वा ? नैकेषां प्रश्नानाम् उत्तराणि वाञ्छन्ति जनाः। संयुक्तराष्ट्रसंघेन सततविकासविषये सप्तदशलक्ष्याणि अंगीकृतानि। तत्र चतुर्थं लक्ष्यं शिक्षासम्बद्धं वर्तते। तच्च-

Ensure inclusive and equitable
quality education and promote
lifelong learning opportunities for all.[ii]

भारतस्य २०२०-राष्ट्रियशिक्षानीतौ अपि कथितं यत् लक्ष्यम् इदं २०३० पर्यन्तं पूर्णं भवेत्।एतस्य पूर्तये शिक्षायाः भारतीया संकल्पना अपि अध्येतव्या। 'शिक्षेत्यादि श्रुतेरङ्गम्' इत्युक्ते वेदस्य अङ्गत्वेन शिक्षा वर्तते। सायणाचार्यः कथयति-

**स्वरवर्णाद्युच्चारणप्रकारो यत्र शिक्ष्यते**
**उपदिश्यते सा शिक्षा**[iii]

अर्थात् उच्चारणप्रक्रियापाठनं शिक्षेति। व्याकरणदृष्ट्या विद्योपादाने इत्यर्थे शिक्ष् धातुना शब्दोऽयं निष्पद्यते यस्य व्यावहारिकः अर्थः विद्यायाः विनिमयप्रक्रियेति विद्यते। अतः विद्याशिक्षयोः भेदः भारतीयज्ञानपरम्परायां प्रकल्पितः। यदा शैक्षिकविकासस्य प्राप्तये रूपरेखा निर्धारणीया चेत् विकासः, शिक्षा, विद्या आदयः इत्येताः प्रमुखाः संकल्पनाः विस्तरेण पत्रेऽस्मिन् विवेचिताः।

**उद्देश्यानि-**

अस्य पत्रस्य उद्देश्यं भारतीयज्ञानधारितम् अध्ययनं विधाय सैद्धान्तिकरूपेण सततशैक्षिकविकासविषये अन्तरविषयकसाहित्यस्य संश्लेषणं वर्तते। तदाधारेण व्यापकदृष्ट्या परिणामानां विविधवर्गेषु अभिज्ञानम् वर्तते।

1. भारतीयज्ञानसन्दर्भे शिक्षासंकल्पनायाः सततविकासस्य अवधारणायाः च अध्ययनम्।
2. सततशैक्षिकविकाससन्दर्भे अन्तर्विषयकसाहित्यस्य संश्लेषणम्।

2024 TPJ | VOLUME 2, ISSUE 3
July - September | ISSN – 2584- 0517

3. सततशैक्षिकविकासस्य अवधारणात्मकी सैद्धान्तिकरूपरेखायाः प्रतिपादनम्।

**सम्बद्धसाहित्यम्-**

विविधानां सम्बद्धग्रन्थानां समीक्षया ज्ञायते यत् भारतीयज्ञानपरिप्रेक्ष्ये सततविकासस्य तस्य जटिलतानां च अवगमनार्थं प्रासंगिकसैद्धान्तिकरूपरेखायाः आवश्यकता दृश्यते। विशिष्य शिक्षाक्षेत्रे आवश्यकता परिलक्ष्यते। समीक्षा दर्शयति यत् सततविकासस्य भारतीयसन्दर्भाः नितान्तप्रासंगिकाः स्पष्टाश्च सन्ति। शिक्षायाः विद्यायाश्च भारतीया अवधारणा सर्वदा विद्वद्भिः चर्च्यते। शिक्षायाः प्राच्यधारा अद्यापि संस्कृतशिक्षाजगति जीवति, तथापि भारतीये सन्दर्भे शैक्षिकविकासस्य कार्यात्मकपरिभाषायाः निर्माणं कृत्वा तदनु सततशैक्षिकविकासस्य लक्ष्यपूर्तये शिक्षाशास्त्रीणां प्रयत्नानाम् अभावः दरीदृश्यते। भारतीयानां शैक्षिकसंकल्पनानां प्रासंगिकतायाः कार्यात्मकनिरूपणस्य अभावः वर्तते।

**शोधप्रश्नाः-**

1. भारतीयज्ञानपरम्परायां शिक्षायाः संकल्पना कीदृशी ?
2. किं भारतीयज्ञानपरम्परायां सततविकासस्य संकल्पना वर्तते?
3. भारतीयज्ञानपरम्परादृशा सततशैक्षिकविकासस्य सैद्धान्तिकरूपरेखा कीदृशी ?

**शोधविधिः-**

अस्मिन् पत्रे सततशैक्षिकविकासविषये बहुविषयकसाहित्यस्य समीक्षायै सम्प्रत्यात्मकविश्लेषणस्य उपयोगः कृतः। अनेन साहित्ये विद्यमानानां समानतानां पद्धतीनां सिद्धान्तानां च अभिज्ञानं क्रियते। तदनन्तरं लब्धसिद्धान्तान् अधिकृत्य विविधपद्धतीनां संश्लेषणं वर्तते। तदनु विकासस्य विविधानाम् अवधारणाणानां स्वातन्त्र्येण प्रतिपादनं विधाय सततशैक्षिकविकासस्य अवधारणात्मकरूपरेखाया भारतीयज्ञानसन्दर्भे स्वरूपं निश्चीयते।एतदर्थं भारतीयं वाङ्मयम् अधीत्य तत्र विद्यमानसततशैक्षिकविकाससम्बद्धविषयस्य तुलनां विश्लेषणं संश्लेषणं च विधाय समीक्षणम् अत्र विहितम् ।

**विश्लेषणम्-**

शिक्ष् विद्योपादाने धातुना निष्पद्यते शिक्षाशब्दः। विद्यायाः विनिमयप्रक्रियेति शिक्षा विद् ज्ञाने धातुना निष्पन्नः विद्याशब्दः ज्ञानार्थक। अतः ज्ञानस्य व्यवस्थातन्त्रत्वेन शिक्षां द्रष्टुं शक्यते। ज्ञानं ब्रह्मणः स्वरूपलक्षणं पवित्रतमा सत्ता च वर्तते। आत्मज्ञानम् एव प्रधानज्ञानम्। अध्यात्ममेव शिक्षायाः अधिष्ठानम् अत्र विचारितम् आत्मतत्त्वम् अव्यक्तं वर्तते।अस्य अव्यक्तस्य व्यक्तस्वरूपं सृष्टिरिति। सृष्टिरेव आत्मतत्त्वस्य विश्वरूपम् अपि भवति। सृष्टेः धारणार्थं धर्मः। धर्मः विश्वनियमः, स्वभावः कर्तव्यश्च अस्ति। अतः शिक्षा धर्मानुसारिणी भवेदिति भारतीया संकल्पना। अस्याः शिक्षायाः विकासाय विकासस्य अवधारणा अपि स्पष्टिकर्तव्या।

सम्प्रति विकासनाम्ना यन्त्री वृद्धिः क्रियते। मानवीयभावानां ह्रासः दृश्यते। आत्मीयतायाः अभावः परिलक्ष्यते। संसाधनेषु वृद्धिः विकासः इति जनाः मन्वन्ते। सन्दर्भेऽस्मिन् सततविकासः संधारणीयः विकासो वा तादृशः भवेत् यत्र उपर्युक्ताः विकाराः न स्युः। भारतीयज्ञानदृशा विकासः स्वकेन्द्रितः नैव अपितु स्वस्मात् प्राक् अन्येषां प्राधान्यम् इति विचारकेन्द्रितः वर्तते। अस्य केचन प्रमुखाः सिद्धान्ता—

- विकासप्रक्रिया अन्तस्तात् आरभते न तु बहिस्तात्।
- विकासः एकरेखीयः नस्ति अपितु चक्रियः अस्ति।
- विकासः समन्वितः वर्तते न तु एकाङ्गी।
- विकासः स्वतः जायते अथ च प्रयत्नैरपि जायते।

संयुक्तराष्ट्रदृष्ट्या सततशैक्षिकविकासे त्रयः महत्त्वपूर्णाः अंशाः विद्यन्ते- समानगुणवत्ता, समावेशविचारः, जीवनपर्यन्ताधिगमः अवसराश्च। अत्र त्रयः अपि विवेच्यन्ते।

**निष्कर्षाः -**

2024 TPJ | VOLUME 2, ISSUE 3
July - September | ISSN – 2584- 0517

- भारतीयज्ञानसन्दर्भे शिक्षा ज्ञानव्यवस्था तन्त्ररूपेण आत्मतत्त्वनिष्ठा धर्मानुसारिणी च वर्तते।
- भारतीयज्ञानसन्दर्भे विकासः चक्रीयः, समन्वितः, तस्य आन्तरिकारम्भश्च अतः सातत्यम्।

- समानगुणवत्तायै समावेशाय जीवनपर्यन्ताधिगमाय च भारतीयज्ञानपरम्परायां नैके मार्गाः प्रतिपादिताः।

**उपसंहारः –**

अस्य शोधपत्रस्य लेखनावसरे भारतीयज्ञानसन्दर्भे विविधग्रन्थानाम् अध्ययनं विधाय तत्र वर्णितानां विचाराणां समन्वयस्य संश्लेषणस्य च प्रयत्नः विहितः। तदाधारेण शैक्षिकविकासस्य संकल्पना विवेचिता। शिक्षा केवलं वृत्तिप्राप्त्यर्थं नैवापितु जीवनस्य परमलक्ष्यावाप्तये व्यवस्थातन्त्रत्वेन कार्यं करोति। अतः जीवनपर्यन्तं शिक्षा अस्मान् अभिप्रेरयति आत्मतत्त्वज्ञानाय। तदङ्गतया परा विद्या अपरा विद्या च अध्येतव्या। ज्ञानार्जनस्य करणानि दृढीकृत्य परमज्ञानावाप्तये सततशैक्षिकविकासस्य निश्चितः क्रमः एव अवधारणात्मकी सैद्धान्तिकरूपरेखारूपेण वर्तते।

2024 TPJ | VOLUME 2, ISSUE 3
July - September | ISSN – 2584- 0517

[i] बृहदारण्यकोपनिषद् 1-3-28, राजारामः(सं) बम्बई पुस्तकालयः, लाहौरम्, 1913

[ii] Transforming our world: The 2030 Agenda for Sustainable Development. United Nations.

[iii] ऋग्वेदभाष्यम् सायणाचार्य